१७

गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।इन्द्रः। जगती, ८-९ त्रिष्टुप्

**तद॑स्मै॒ नव्य॑मङ्गिर॒स्वद॑र्चत॒ शुष्मा॒ यद॑स्य प्र॒त्नथो॒दीर॑ते।**

**विश्वा॒ यद्गो॒त्रा सह॑सा॒ परी॑वृता॒ मदे॒ सोम॑स्य दृंहि॒तान्यैर॑यत्॥ २.०१७.०१**

अस्मै- एतस्मै इन्द्राय। नव्यम्- अभिनवम्। अङ्गिरस्वत्- ज्योतिष्मत्। तत्- स्तोत्रम्। अर्चत- समर्प्य पूजयत। अस्य- एतस्येन्द्रस्य। शुष्माः- शत्रुशोषकबलानि। प्रत्नथा- सनातनतया। उदीरते- उद्गच्छन्ति। दृंहितानि- दृढान्। विश्वा- सर्वान्। गोत्रा- मेघान् जडप्रतीकान्। परीवृता- जडोन्मुखभावनाख्यावरणभूतैर्वृत्रैरावृतान्। सहस- स्वसहनशीलतया। सोमस्य मदे- रसानन्दे। ऐरयत्- अपां मूलशक्तिधाराणां निष्पत्त्यर्थं प्रेरयति ॥१॥

**स भू॑तु॒ यो ह॑ प्रथ॒माय॒ धाय॑स॒ ओजो॒ मिमा॑नो महि॒मान॒माति॑रत्।**

**शूरो॒ यो यु॒त्सु त॒न्वं॑ परि॒व्यत॑ शी॒र्षणि॒ द्यां म॑हि॒ना प्रत्य॑मुञ्चत॥ २.०१७.०२**

यः। प्रथमाय- मुख्याय। धायसे- रसानुभवाय। ओजः- तेजः। मिमानः- तक्षन्। महिमानम्- माहात्म्यम्। आतिरत्- अवर्धयत्। सः- असाविन्द्रः। भूतु- भवतु। शूरः- समर्थः। यः। युत्सु- युद्धेषु। तन्वम्- स्वदेहम्। परिव्यत- वर्मणा परिवीतमकरोत्। द्याम्- आकाशभावनोपलक्षितविस्तारभावं प्रति। शीर्षाणि- योगिनां शिरांसि। महिना- स्वमाहात्म्येन। अमुञ्चत- मुमोच। चित्तवृत्त्या कुण्ठिताः शिरोगतचित्तवृत्तीराकाशोपलक्षितविस्तारभावनया विमोचितवानिति भावः ॥२॥

**अधा॑कृणोः प्रथ॒मं वी॒र्यं॑ म॒हद्यद॒स्याग्रे॒ ब्रह्म॑णा॒ शुष्म॒मैर॑यः।**

**र॒थे॒ष्ठेन॒ हर्य॑श्वेन॒ विच्यु॑ताः॒ प्र जी॒रयः॑ सिस्रते स॒ध्र्य१॑क्पृथ॑क्॥ २.०१७.०३**

Dr. Rangaji

WEBOLIM

अध- अथ। महत्- बृहत्। प्रथमम्- मुख्यम्। वीर्यम्। अकृणोः- अकरोः। अस्य- अपां मूलशक्तिधाराणां गवां चिद्रश्मीनां वा। अग्रे। ब्रह्मणा- मेधया मन्त्रेण वा। शुष्मम्- स्ववीर्यम्। ऐरयः- प्रेरयसि। रथेष्ठेन- रथस्थेन। हर्यश्वेन- प्राणाश्वेन। विच्युताः- विमुक्ताः। जीरयः- निष्पन्ना रसा अथवा जडोपलक्षितं मेघं जीर्णयित्वा जाता आपो मूलशक्तिधाराः। सध्र्यक्- यद्यपि सङ्गताः। पृथक्- तथापि असंश्लिष्टाः। सिस्रते- स्रवन्ति। अथवा। जीरयः- जरयितारो राक्षसाः। सिस्रते- धावन्तीति सायणः ॥३ ॥

**अधा॒ यो विश्वा॒ भुव॑ना॒भि म॒ज्मनै॑शान॒कृत्प्रव॑या अ॒भ्यव॑र्धत।**

**आद्रोद॑सी॒ ज्योति॑षा॒ वह्नि॒रात॑नो॒त्सीव्य॒न्तमां॑सि॒ दुधि॑ता॒ सम॑व्ययत्॥ २.०१७.०४**

अध- अपि च। यः। विश्वा भुवना- सर्वान् लोकान्। मज्मना- शोधनशक्त्या। प्रवयाः- सनातनः। ईशानकृत्- इन्द्रः परमेश्वरः। अभि- आभिमुख्येन। अभि- अभितः। अवर्धत- अवर्धयत्। आत्- अनन्तरम्। रोदसी- द्यावापृथिव्यौ। ज्योतिषा- स्वप्रकाशेन। वह्निः- अग्निः सन्। आतनोत्- विस्तृतवान्। दुधिता- दुःस्थितान्। तमांसि- अन्धकारान्। सीव्यन्- विस्तारयन्। समव्ययत्- आवृणोत्। प्रथमं तमो व्यापयन् तदनन्तरं वह्निभूतः प्रकाशं विस्तारयतीति भावः ॥४ ॥

**स प्रा॒चीना॒न्पर्व॑तान्दृंह॒दोज॑साधरा॒चीन॑मकृणोद॒पामपः॑।**

**अधा॑रयत्पृथि॒वीं वि॒श्वधा॑यस॒मस्त॑भ्नान्मा॒यया॒ द्याम॑व॒स्रसः॑॥ २.०१७.०५**

सः- असाविन्द्रः। प्राचीनान्- प्रकर्षेण गच्छतः। पर्वतान्- मेघान् जडप्रतीकान्। ओजसा- स्ववीर्येण। दृंहत्- अपां निष्पादनाय स्तम्भितवान्। अपामपः- उदकोपलक्षितमूलशक्तिधाराः। अधराचीनम्- अस्मदर्थमवतरतीः। अकृणोत्- अकरोत्। विश्वधायसम्- सर्वधारिणीम्। पृथिवीम्- भूमिम्। अधारयत्- दधार। मायया- स्वप्रज्ञया। अवस्रसः- अधःपतनात्। द्याम्-

Dr. Rangan ji
WEBOLIM

व्योमोपलक्षितग्रहनक्षत्राणि। अस्तभ्नात्- स्तम्भितवान्। इन्द्रस्यैवाकर्षणशक्तिभूतो हरिर्येन ग्रहनक्षत्राणीन्द्रः स्तम्भयति ॥५॥

**सास्मा॒ अरं॑ बा॒हुभ्यां॒ यं पि॒ताकृ॑णो॒द्विश्व॑स्मा॒दा ज॒नुषो॒ वेद॑स॒स्परि॑।**
**येना॑ पृथि॒व्यां नि क्रिविं॑ श॒यध्यै॒ वज्रे॑ण ह॒त्व्यवृ॑णक्तुवि॒ष्वणिः॑॥ २.०१७.०६**

सः- असाविन्द्रः। अस्मै- एतस्मै भुवनाय। अरम्- पर्याप्तः। यम्। विश्वस्मात्- सर्वस्मात्। जनुषः- जनात्। वेदसः- ज्ञानादपि। परि- विशिष्टम्। आ- आभिमुख्येन। पिता- हिरण्यगर्भो महत्तत्वाधिदेवता। बाहुभ्याम्- पाण्युपलक्षितशोभनकर्मणा। अकृणोत्- चकार। येन। क्रिविम्- क्षेप्तारम्। वज्रेण- स्वायुधेन। हत्वी- हत्वा। नि- नितराम्। पृथिव्याम्- भूम्याम्। शयध्ये- मूर्च्छायै मृत्यवे वा। तुविष्वणिः- प्रभूतस्वनः। अवृणक्- अवधीत् ॥६॥

**अ॒मा॒जूरि॑व पि॒त्रोः सचा॑ स॒ती स॑मा॒नादा सद॑स॒स्त्वामि॑ये॒ भग॑म्।**
**कृ॒धि प्र॑के॒तमुप॑ मा॒स्या भ॑र द॒द्धि भा॒गं त॒न्वो॒३॒॑ येन॑ मा॒महः॑॥ २.०१७.०७**

अमाजूः- गृह एव जीर्यन्ती। सती- साध्वी। सचा- पितृभ्यां सहिता। समानात् सदसः- आत्मनः पित्रोश्च साधारणसदनात्। इव। त्वाम्- भवन्तम्। भगम्- भागम्। इये- याचामि। प्रकेतम्- प्रज्ञानम्। कृधि- कुरु। उप मासि- प्रमाणं यच्छ। आ भर- आवह। येन। मामहः- महतीः शक्तीः प्राप्स्यामि तम्। तन्वो- स्वतनुजाय मह्यम्। भागम्। दद्धि- धारय ॥७॥

**भो॒जं त्वामि॑न्द्र व॒यं हु॑वेम द॒दिष्ट्वमि॑न्द्रा॒पांसि॒ वाजा॑न्।**
**अ॒वि॒ड्ढी॑न्द्र चि॒त्रया॑ न ऊ॒ती कृ॒धि वृ॑षन्निन्द्र॒ वस्य॑सो नः॥ २.०१७.०८**

भोजम्- सम्भक्तारम्। त्वाम्। इन्द्र- परमेश्वर। वयम्। हुवेम- आह्वयामः। इन्द्र। त्वम्। अपाम्- जीवोदकस्य। वाजानाम्- गतीनाम्। ददिः- दाता। इन्द्र। नः- अस्मान्। चित्रया- असाधारण्या।

Dr. Rangaji
WEBOLIM

ऊती- रक्षया। अविड्ढि- रक्ष। वृषन्- वर्षक। इन्द्र। नः- अस्मान्। वस्यसः- सम्पद्वतः। कृधि- कुरु ॥८॥

**नू॒नं सा ते॒ प्रति॒ वरं॑ जरि॒त्रे दु॑ही॒यदि॑न्द्र॒ दक्षि॑णा म॒घोनी॑।**

**शिक्षा॑ स्तो॒तृभ्यो॒ माति॑ ध॒ग्भगो॑ नो बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑॥ २.०१७.०९**

पूर्वं व्याख्यातम् (२.११.२१) ॥९॥ऋ

Dr. Ranganji

WEBOLIM